# ३. के कुर्वन्ति ?

## ३.१ एते/ते



एते छात्राः ।
एते पठन्ति ।
के पठन्ति ?
एते छात्राः पठन्ति ।



ते अश्वाः ।
ते धावन्ति ।
के धावन्ति ?
ते अश्वाः धावन्ति ।



छात्राः लिखन्ति ।



पुरुषाः उपविशन्ति ।



शकटाः गच्छन्ति ।



बालकाः पश्यन्ति ।

• **कृतिः –** शिक्षक, वैद्य, चित्रकार, गायक, सैनिक, याचक, वृद्ध, पुरुष, बालक, सिंह, रक्षक | एतैः शब्दैः सह छात्राः परिचितक्रियापदानि योजयित्वा बहुवचनवाक्यानि वदन्ति ।

## ३.२ एताः/ताः



एताः बालिकाः।
एताः वदन्ति ।
काः वदन्ति ?
एताः बालिकाः वदन्ति ।




ताः विद्यार्थिन्यः ।
ताः नृत्यन्ति ।
काः नृत्यन्ति ?
ताः विद्यार्थिन्यः नृत्यन्ति ।



चटकाः कूजन्ति ।



महिलाः नमन्ति ।



पिपीलिकाः गच्छन्ति ।



ताः खेलन्ति ।

• **कृतिः–** शिक्षकः शब्दं वदति । छात्राः बहुवचनं वदन्ति । यथा मापिका-मापिकाः ।
पेटिका, छात्रा, वैद्या, निवेदिका, अङ्गुली, पुस्तिका, लेखनी, कूपी, द्रोणी ।

## ३.३ एतानि/तानि

☞ 

☞ 

एतानि कमलानि । एतानि विकसन्ति ।
कानि विकसन्ति? एतानि कमलानि विकसन्ति ।

तानि पत्राणि । तानि पतन्ति ।
कानि पतन्ति? तानि पत्राणि पतन्ति ।



विमानानि गच्छन्ति ।



यानानि तिष्ठन्ति ।




वाहनानि धावन्ति।

● **कृति:- चित्रं दृष्ट्वा वाक्यं लिखत ।**




______________



______________



______________



______________

## भाषाभ्यास:

### १. वाक्यानि पूरयत ।

१. एते ________ (सिंह) गर्जन्ति ।
२. ________(के/का:/कानि) यानानि धावन्ति?
३. महिला: ________ । (वदति/वदन्ति)
४.______ बालिका: नृत्यन्ति। (ते/ता:/तानि)
५.________(नदी) वहन्ति ।
६. वैद्या: ________ । (पश्यति/पश्यन्ति)

### गायत! नन्दत!

सर सर आयान्ति वर्षाधारा:
अत्र प्रसन्ना: सर्वे जीवा: ।
वृक्षै: प्राप्तं नवजीवनम्
नृत्यन्ति मोदेन बाला: सततम् ।।१।।

धप् धप् पतन्ति जलप्रपाता:
डूँव डूँव कुर्वन्ति कूपमण्डूका: ।
टप् टप् गायन्ति पर्णेषु बिन्दव:
पक्कवटखादने मग्ना जना: ।।२।।

कृष्णान् मेघान् पश्य आकाशे
धडाम् धुडुम् धडाम् धुडुम् गर्जन्ति ते ।
जलेन क्लिन्नं जातमङ्गं
धो धो धो वर्षन्ति मेघा: सततम् ।।३।।

नृत्यं कुर्वन्ति मयूरास्ते
सिंहा गर्जन्ति ननु मेघनाद: ।
सत्वरं वहन्ति सागरं नद्य:
प्राणा हि प्राणिनां वर्षाकाल: ।।४।।

**डॉ. श्रीहरि: गोकर्णकर:**

